শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৩১

*বলিৱিধ্ৱংসনম্*

প্ৰীত্যা দৈত্যস্তৱ তনুমহঃ প্ৰেক্ষণাত্ সৰ্ৱথাপি
ত্ৱামারাধ্যন্নজিত রচযন্নঞ্জলিং সঞ্জগাদ।
মত্তঃ কিং তে সমভিলষিতং ৱিপ্ৰসূনো ৱদ ত্ৱং
ৱ্যক্তং ভক্তং ভৱনমৱনিং ৱাপি সৰ্ৱং প্ৰদাস্যে॥ ১ ॥

তামক্ষীণাং বলিগিরমুপাকৰ্ণ্য কারুণ্যপূৰ্ণো-
প্যস্যোতসেকং শমযিতুমনা দৈত্যৱংশং প্ৰশংসন্।
ভূমিং পাদত্ৰযপরিমিতাং প্ৰাৰ্থযামাসিথ ত্ৱং
সৰ্ৱং দেহীতি তু নিগদিতে কস্য হাস্যং ন ৱা স্যাত্॥ ২ ॥

ৱিশ্ৱেশং মাং ত্ৰিপদমিহ কিং যাচসে বালিশস্তৱং
সৰ্ৱাং ভূমিং ৱৃণু কিমমুনেত্যালপত্ত্ৱাং স দৃপ্যন্।
যস্মাদ্দৰ্পাত্ ত্ৰিপদপরিপূৰ্ত্যক্ষমঃ ক্ষেপৱাদান্
বন্ধং চাসাৱগমদতদৰ্হোপি গাঢোপশান্ত্যৈ॥ ৩ ॥

পাদত্ৰয্যা যদি ন মুদিতো ৱিষ্টপৈৰ্নাপি তুষ্যে
দিত্যুক্তেস্মিন্ ৱরদ ভৱতে দাতুকামেথ তোযম্।
দৈত্যাচাৰ্যস্তৱ খলু পরিক্ষাৰ্থিনঃ প্ৰেরণাত্তং
মা মা দেযং হরিরযমিতি ৱ্যক্তমেৱাবভাষে॥ ৪ ॥

যাচত্যেৱং যদি স ভগৱান্ পূৰ্ণকামোস্মি সোহং
দাস্যাম্যেৱ স্থিরমিতি ৱদন্ কাৱ্যশপ্তোপি দৈত্যঃ।
ৱিন্ধ্যাৱল্যা নিজদযিতযা দত্তপাদ্যায তুভ্যং
চিত্ৰং চিত্ৰং সকলমপি স প্ৰাপযত্তোযপূৰ্ৱম্॥ ৫ ॥

নিঃসন্দেহং দিতিকুলপতৌ ত্বয্যশেষাৰ্পণং তদ-
ৱ্যাতন্বানে মুমুচুৰৃষয়ঃ সামৰাঃ পুষ্পৱৰ্ষম্।
দিৱ্যং ৰূপং তৱ চ তদিদং পশ্যতাং ৱিশ্বভাজা-
মুচ্চৈৰুচ্চৈৰৱৃধদৱধীকৃত্য ৱিশ্বাণ্ডভাণ্ডম্॥ ৬ ॥

ত্বৎপাদাগ্ৰং নিজপদগতং পুণ্ডৰীকোদ্ভৱোঽসৌ
কুণ্ডীতোয়ৈৰসিচদপুনাদ্যজ্জলং ৱিশ্বলোকান্।
হৰ্ষোৎকৰ্ষাৎ সুবহু নন়ৃতে খেচৰৈৰুৎসৱেঽস্মিন্
ভেৰীং নিঘ্নন্ ভুৱনমচৰজ্জাম্বৱান্ ভক্তিশালী॥ ৭ ॥

তাৱদ্দৈত্যাস্ত্বনুমতিমৃতে ভৰ্তুৰাৰব্ধযুদ্ধাঃ
দেৱোপেতৈৰ্ভৱদনুচৰৈস্সঙ্গতা ভঙ্গমাপন্।
কালাত্মাযং ৱসতি পুৰতো যদ্ৱশাৎ প্ৰাগ্জিতাঃ স্মঃ
কিং ৱো যুদ্ধৈৰিতি বলিগিৰা তেঽথ পাতালমাপুঃ॥ ৮ ॥

পাশৈৰ্বদ্ধং পতগপতিনা দৈত্যমুচ্চৈৰৱাদী-
স্তাৰ্তীযীকং দিশ মম পদং কিং ন ৱিশ্বেশ্বৰোঽসি।
পাদং মূৰ্ধ্নি প্ৰণয ভগৱন্নিত্যকম্পং ৱদন্তং
প্ৰহ্লাদস্তং স্বযমুপগতো মানযন্নস্তৱীত্ত্বাম্॥ ৯ ॥

দৰ্পোচ্ছিত্ত্যৈ ৱিহিতমখিলং দৈত্য সিদ্ধোঽসি পুণ্যৈ-
ৰ্লোকস্তেঽস্তু ত্ৰিদিৱৱিজযী ৱাসৱত্বং চ পশ্চাৎ।
মৎসাযুজ্যং ভজ চ পুনৰিত্যন্বগৃহ্ণা বলিং তং
ৱিপ্ৰৈস্সন্তানিতমখৱৰঃ পাহি ৱাতালযেশ॥ ১০ ॥

**********